# herambopasthAnam

# હેરમ્બોપસ્થાનમ્

## Document Information

Text title : herambopasthAnam

File name : herambopasthAnam.itx

Category : ganesha, stotra, gaNapati-muni, ramaNa-maharShi

Location : doc_ganesha

Author : Ganapati Muni with Ramana Maharshi

Transliterated by : DPD

Proofread by : DPD

Description-comments : From The Collected Works of Vasishtha Kavyakantha Ganapati Muni Vol 1

Latest update : November 24, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# હેરમ્બોપસ્થાનમ્

પ્રથમઃ ખણ્ડઃ (શશિવદનાવૃત્તમ્)

શ્રિયમસમાનાં મમ શુભનામા ।
દિશતુ ગણાનાં પતિરતિધામા ॥ ૧॥

વિજિતજરાધિં વિનિહતરોગમ્ ।
દ્વિરદમુખો મે વિતરતુ યોગમ્ ॥ ૨॥

વિતરતુ મહ્યં નિજપદભક્તિમ્ ।
ગણપતિરગ્ર્યામપિ ભુજશક્તિમ્ ॥ ૩॥

હરતનયો મે વિભુરતિહૃદ્યમ્ ।
વિતરતુ ભૂતપ્રવિમલવિદ્યામ્ ॥ ૪॥

મમ કરિવક્ત્રઃ પ્રભુરનવદ્યામ્ ।
દિશતુ ભવિષ્યદ્વિદમુડુવિદ્યામ્ ॥ ૫॥

નિજવિષયાજિષ્વઘહિમભાનો ।
ઇમમવિજેયં કુરુ હરસૂનો ॥ ૬॥

સુમધુરમાધ્વીધરપદજાતમ્ ।
કરિમુખ દાસં કુરુ કવિમેતત્ ॥ ૭॥

ગણપતિરૂપં મનસિ કરોમિ ।
ગણપતિકિર્તીં વચસિ તનોમિ ॥ ૮॥

મમ ગણનાથઃ શમયતુ પાપમ્ ।
સપદિ વિમુષ્ણાત્વપિ પરશાપમ્ ॥ ૯॥

શશિવદનાનાં નવકૃતિરેષા ।
ભજતુ ગણેશં પતિમિવ યોષા ॥ ૧૦॥

દ્વિતીયઃ ખણ્ડઃ (મદલેખાવૃત્તમ્)

આહ પ્રાજ્ઞજનસ્ત્વાં મૂલાધારનિશાન્તમ્ ।
મન્દે સુપ્તમિભાસ્ય જ્ઞે યુક્તે વિલસન્તમ્ ॥ ૧૧॥

અસ્તિ વ્યોમ્નિ ગુરુર્યસ્તસ્યૈવ ત્વમિહાસિ ।
વિઘ્નેશાનવિવર્તઃ સદ્ભક્તેષુ વિભાસિ ॥ ૧૨॥

કોઽપિ પ્રાભવશાલી મૂલાધારવિહારી ।
પ્રજ્ઞાસિદ્ધિવધૂભ્યં શ્લિષ્ટો ભાત્યઘહારી ॥ ૧૩॥

આશા મે તવ શક્તિં દેહે દ્રષ્ટુમપારામ્ ।
પાતું ચેશ્વરસૂનો મૂર્ધન્યામૃતધારામ્ ॥ ૧૪॥

યા ચિત્ સા તવ માતા યઃ શ્રેષ્ઠઃ સ પિતા તે ।
સિદ્ધિર્બાહ્યમતિર્યે તે નાથ પ્રમદે તે ॥ ૧૫॥

યા લિપ્સા હૃદયે મે તાં પૂર્ણાં કુરુ મા વા ।
એષાઙ્ગીક્રિયતાં મે મત્તેભાનન સેવા ॥ ૧૬॥

ના ખે યાતિ સુરો વા ત્વં ચેત્ કિઞ્ચિદુદાસ્યમ્ ।
આધારે વિદધાસિ સ્કન્દસ્યાગ્રજ લાસ્યમ્ ॥ ૧૭॥

ન સ્વાર્થે મમ યત્નો નિઃસ્વાર્થે મમ સોઽયમ્ ।
ઉદ્યોગઃ શિવસૂનો સદ્યો દેહિ સહાયમ્ ॥ ૧૮॥

માહાત્મ્યં નનુ વક્તું કઃ શક્તઃ પુરુષસ્તે ।
હસ્તીન્દ્રાનન ભાગ્યં સર્વેષાં તવ હસ્તે ॥ ૧૯॥

એતઃ સમ્મદકત્રીર્હૈરમ્બીર્મદલેખાઃ ।
સેવન્તાં કવિભૃઙ્ગાશ્ચાન્દ્રીર્ભા ઇવ લેખાઃ ॥ ૨૦॥

તૃતીય ખણ્ડઃ (ઇન્દ્રવજ્રાવૃત્તમ્)

એકાદશાનાં પ્રવરં સુતાનાં રુદ્રસ્ય મન્ત્રાધિપતિં નમામિ ।
શાસ્ત્રાણિ સર્વાણ્યપિ યસ્ય કીલાઃ સૂર્યાનપોહ્યં તિમિરં હરન્તિ ॥ ૨૧॥

પ્રાજ્ઞેન બુદ્ધ્યા યદકારિ પદ્યં સધારણસ્તત્ર તવોપકારઃ ।
હેરમ્બ યન્મન્ત્રમૃષિશ્ચકાર વ્યક્તોવિશિષ્ટસ્તવ તત્ર યત્ર ॥ ૨૨॥

જિહ્વાસ્થલં નાથ વિગાહમાનં ત્વામાહુરુચ્છિષ્ટમયિ છલોક્ત્યા ।
ઉચ્છિષ્ટતા ચેત્તવ રુદ્રસૂનો સ્વાધ્યાયનિષ્ઠીવનતોર્ભિદા કા ॥ ૨૩॥

સર્વાણિ ધાન્યાનિ ચ ભક્ષયન્તં દન્તૈઃ શિતૈર્દેવ સહાયવન્તમ્ ।
એતં બિલસ્થં રસનાહ્વયં તે વાહં વિદો મૂષિકમામનન્તિ ॥ ૨૪॥

આધારચક્રે વસતો ગણેશ જ્યોતિર્મયાણોર્જ્વલતઃ સદાતે ।
એકઃ પચત્યન્નમશેષમૂષ્મા સમ્પ્રેરયન્ત્ય ઇમાસ્તુ વાચઃ ॥ ૨૫॥

વૈશ્વાનરોઽગ્નિઃ સકલસ્ય જીવો વાગિન્દ્રિયાગ્નિઃ શિવનન્દન ત્વમ્ ।
યો વેદ નૈવ યુવયોર્વિભેદં પિણ્ડેષુ ના મુહ્યતિ સ પ્રસઙ્ગે ॥ ૨૬॥

ત્વાં બ્રહ્મણસ્પત્યભિધાનમાહુઃ કેચિદ્વિભોરીશપદસ્ય પુત્રમ્ ।
અન્યૈર્બૃહસ્પત્યભિધાન ઉક્તો ધીરૈર્વિભોરિન્દ્રપદસ્ય મન્ત્રી ॥ ૨૭॥

જિહ્વૈવ વેદિસ્તવ તોયપૂતા લોકપ્રસઙ્ગસ્તવ તત્ર ધૂમઃ ।
જ્વાલા જગન્નાથકથા પવિત્રા ચેતો ઘૃતં જુહ્યતિ યત્ર સન્તઃ ॥ ૨૮॥

વિદ્યુન્મયીમૂર્તિરગાદિ જિષ્ણોર્યા મૌનિભિઃ સૈવ તવ સ્વરૂપમ્ ।
ઇન્દ્રસ્ય ભેદસ્તવ ચોદિતો યઃ સ પ્રાણવિદ્યુત્તનુભેદમૂલઃ ॥ ૨૯॥

દિવ્યાગ્નિગાત્રં ધિષણા કલત્રં ભર્ગસ્ય પુત્રં પ્રણતસ્ય મિત્રમ્ ।
દિવ્યાગ્નિરુચો ભજન્તામેતાઃ કરીન્દ્રાનનમિન્દ્રવજ્રાઃ ॥ ૩૦॥

---

ચતુર્થઃ ખણ્ડઃ (વસન્તતિલકવૃત્તમ્)

કિં બૃંહિતાનિ કુરુષે કલુષેણ ભગ્ને
મગ્ને મહાવિપદિ દેવ નિજે વિવર્તે ।
નિદ્રામિ ચેદ્દ્વિરદ બોધય હસ્તઘાતા -
દ્ગચ્છામિ ચેદપથમાશુ નિવર્તયસ્વ ॥ ૩૧॥

વેષસ્ત્વાયમપરો યદિ દેવ નાટ્ય-
મારભ્યતાં તદુચિત્તં કિમુપૈષિ મૌનમ્ ।
એતાં પ્રભો યવનિકામપસારયન્તુ
સક્ષાદ્ગણાસ્તવ કુતઃ ક્રિયતે વિલમ્બઃ ॥ ૩૨॥

એતત્તમો નયનશક્તિહરં ગુહાયં
મર્ગં રુણદ્ધિ ન વિલોકિતુમસ્મિ શક્તઃ ।

સ્નેહોઽસ્તિ કાચન દશાસ્તિ વિભો કટાક્ષ-
જ્યોતિર્લવ સદય દેહિ પુરો વ્રજેયમ્ ॥ ૩૩॥

ઘોરં કરોમિ ન તપો યદિ તેઽપરાધઃ
કિં પ્રેરણં ન કૃતવાનસિ રુદ્રસૂનો ।
સમ્પ્રેરિતશ્ચ ભવતા યદિ નાચરેયં
સમ્પ્રેરણસ્ય તવ કા ગજવક્ત્ર શક્તિઃ ॥ ૩૪॥

કાર્યં ન મે કિમપિ તત્ ખલુ નિર્જરાણાં
રૂપં ન મે કિમપિ તત્તવ કોઽપિ વેષઃ ।
ઇષ્ટં નુ કષ્ટમથ કસ્ય કરીન્દ્રવક્ત્ર
શિષ્ટં તુ મે કિમપિ નામ નરાઙ્ગસઙ્ગિ ॥ ૩૫॥

નામાપિ તત્તવ ભવત્યથવા ગજાસ્ય
ચર્ચા વિનશ્વરતમે તનુકઞ્ચુકે કા ।
વિષ્ણોરિવેન્દુધવલં ભવિતા યશશ્ચેત્
તદ્દન્તકાન્તિષુ તવૈવ લયં પ્રયાતુ ॥ ૩૬॥

સ્થૂલાં તનૂમસુમશેષમનોરથાનાં
સ્થાનં મનશ્ચ ધિષણાં પ્રમદં ચ મૂલમ્ ।
આક્રમ્ય કોશમખિલં ચ વિભો ખલારે
વિદ્યાધિરાજ મયિ દર્શય તે વિભૂતિમ્ ॥ ૩૭॥

દેવી મતિર્જલપત્રવિશાલનેત્રા
દેવી ચ સિદ્ધિરકલઙ્કસુધાકરાસ્યા ।
છયોષ્ણતા ચ દિનનાથમિવ જ્વલન્તં
નિત્યં ભવન્તમિભવક્ત્ર વિભો ભજે તે ॥ ૩૮॥

સિદ્ધેન્દ્રવેષભૃતિ ભૂમિહિતાય રુદ્રે
કૈલાસશૈલમધિતિષ્ઠતિ વજ્રપાણિઃ ।
ધૃત્વા ગજેન્દ્રમુખવેષમમુષ્ય પુત્રો
ભૂત્વા વિભુર્નયતિ પારિષદાનશેષાન્ ॥ ૩૯॥

સમ્મોદયન્તુ હૃદયં દ્વિરદાનનસ્ય
દેવસ્ય સિદ્ધિધિષણા હૃદયેશ્વરસ્ય ।
એતા વસન્તતિલકાઃ કવિકુઞ્જરેણ
ગીતાઃ કયાઽપ્યમલભાવનયા યુતેન ॥ ૪૦॥

॥ ઇતિ શ્રીભગવન્મહર્ષિરમણાન્તેવાસિનો વાસિષ્ઠસ્ય
નરસિંહસૂનોઃ ગણપતેઃ કૃતિર્હેરમ્બોપસ્થાનં સમાપ્તમ્ ॥

Encoded and proofread byDPD

*herambopasthAnam*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*